"प्रधानधारा या स्वर्गे सा च मन्दाकिनी
स्मृता ।
योजनायुतविस्तीर्णा प्रस्थेन योजना स्मृता ॥
क्षीरतुल्यजला शश्वदत्युत्तुङ्गतरङ्गिणी ।
वैकुण्ठाद्ब्रह्मलोकञ्च ततः स्वर्गं समागता ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे जाह्नवी-
जन्मप्रस्तावे ३४ अध्यायः ॥ * ॥ संक्रान्ति-
विशेषः । अस्य प्रमाणं मन्दाशब्दे द्रष्टव्यम् ॥
(चित्रकूटस्थनदीविशेषः । यथा, महाभारते ।
३ । ८५ । ५८ ।
"ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते ।
मन्दाकिनीं समासाद्य सर्व्वपापप्रणाशिनीम् ॥"
द्वारकास्थनदीविशेषः । यथा, महाभारते ।
हरिवंशपर्व्वणि । १५५ । २२ ।
"वैदूर्य्यपत्रैर्व्विमलैस्तथा मन्दाकिनी नदी ।
भाति पुष्करिणी रम्या पूर्व्वस्यां दिशि
भारत ! ॥"
छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"न न र र-घटिता तु मन्दाकिनी ॥"
उदाहरणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥ )
मन्दाक्रान्ता, स्त्री, (मन्दं यथा तथा आक्रान्ता ।)
छन्दोविशेषः । यथा,—
"चत्वारः प्राक् सुतनु गुरवो द्वौ दशैकादशौ चे-
ल्लघ्वौ वर्णौ तदनु कुमुदामोदिनि ! द्वादशान्त्यौ ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते ! विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि ! तां संगिरन्ते ॥"
इति श्रुतबोधः ॥
( अस्याक्रान्ता । यथा,—
"मन्दाक्रान्ता वितरति रसं नेत्त्वयष्टिः सम-
ग्रम् ॥"
इत्युद्भटः ॥ )
मन्दाक्षं, क्ली,(मन्दे सङ्कुचिते अक्षिणी नेत्रे यस्मात् ।
"अक्ष्णोऽदर्शनात् ।"४ । ४ । ७६ । इति समा-
सान्तः अच् ।) लज्जा । इत्यमरः । १।७।२३ ॥
( यथा, नैषधचरिते । ३ । ६१ ।
"मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा
तस्यां समाकुञ्चितवाचि हंसः ।
तच्छंसिते किञ्चन संशयालु-
र्गिरा मुखाम्भोजमयं युयोज ॥")
मन्दाग्निः, पुं, ( मन्दः पाचनासमर्थश्चासावग्नि-
श्चेति । ) कफद्वाराल्पजठरानलः । तस्य निदा-
नादि यथा,—
"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः ।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥
विषमो वातजान् रोगांस्तीक्ष्णः पित्तसमुद्भ-
वान् ।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥
समा समाग्नेरशिता मात्रा सम्यग्विपच्यते ।
स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते ॥"
इति माधवकरः ॥*॥
तस्यौषधं यथा,—

"चित्रकस्याष्टभागानि शूरणस्य च षोड़श ।
शुण्ठ्याश्चत्वारि भागानि मरीचानां द्वयं
तथा ॥
पिप्पली पिप्पलीमूलं विड़ङ्गानां चतुष्टयम् ।
अष्टौ मुशलिभागाश्च त्रिफलायाश्चतुष्टयम् ॥
द्विगुणेन गुड़ेनैषां मोदकानि हि कारयेत् ।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम् ।
अतिशोणितमन्दाग्निशोथाद्यञ्च निवारयेत् ॥"
इति गारुड़े १९८ अध्यायः ॥*॥
अथ जठराग्निविकाराधिकारः । तत्र सन्नि-
कृष्टनिदानपूर्व्वकान् उदराग्निविकारानाह ।
"कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ॥"
तत्र मन्दस्याग्नेर्लक्षणमाह ।
"स्वल्पापि नैव मन्दाग्नेर्मात्रा भुक्तापि पच्यते ।
छर्द्दिर्दाहः प्रसेकः स्याच्छिरोगौरवजाठरम् ॥"
मन्दाग्निजन्यान् विकारानाह ।
"मन्दोऽग्निर्द्देहिनां कुर्य्याद्विकारान् कफसम्भ-
वान् ॥" * ॥
अथ चिकित्सा ।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा ।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी ॥१॥
गुड़ेन शुण्ठीमथवोपकुल्यां
पथ्यातृतीयामथ दाड़िमं वा ।
आमेष्वजीर्णेषु गुदामयेषु
वर्चोविबन्धेषु च नित्यमद्यात् ॥२॥
व्योषं दन्ति त्रिवृच्चित्रं कृष्णाम्लं विचूर्णितम् ।
तच्चूर्णं गुड़संमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुड़ाष्टकं नाम बलवर्णाग्निवर्द्धनम् ।
शोथोदावर्त्तशूलघ्नं प्लीहपाण्ड्वामयापहम् ॥"
सर्व्वचूर्णसमो गुड़ो देयः । गुड़ाष्टकम् । ३ ॥
"दहनाजमोदसैन्धवनागरमरिचानि चाम्ल-
तक्रेण ।
सप्ताहादग्निकरं पाण्डुर्शोनाशनं परमम् ॥"४॥
वैश्वानरः क्षारः ।
"सामुद्रलवणं ग्राह्यमष्टकर्षमितं बुधैः ।
सौवर्च्चलं पञ्चकर्षं विड़सैन्धवधान्यकम् ॥
पिप्पली पिप्पलीमूलं पत्रकं कृष्णजीरकम् ।
तालीशं केशरं चव्यमम्लवेतसकं तथा ।
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्-
बुधः ॥ ५ ॥
मरिचं जीरकं विश्वमेकैकं कर्षमात्रकम् ।
दाड़िमं स्याच्चतुष्कर्षं त्वगेले चार्द्धकर्षके ।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधम् ॥
भक्षयेच्छाणमानं तत् तक्रमस्तुककाञ्जिकैः ।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम् ॥
अर्शांसि ग्रहणी कुष्ठं विबन्धञ्च भगन्दरम् ।
शूलं शोथं श्वासकासावामदोषञ्च हृद्रुजम् ॥
अश्मरीं शर्कराञ्चापि पाण्डुरोगं कृमीनपि ।
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम् ॥
हिताय सर्व्वलोकानां भास्करेणोदीरितम् ।
हन्यात् सर्व्वाण्यजीर्णानि भुक्तमात्रमसंशयम् ॥

निम्बुरसादिकं दत्त्वा गुटिकामप्येके कुर्व्वन्ति ॥६॥
टङ्कणं रसगन्धौ च समं भागं त्रयं विषात् ।
कपर्द्दः स्वर्ज्जिकाक्षारो मागधी विश्वभेषजम् ॥
पृथक् पृथक् कर्षमात्रं वसुभागमिहोषणम् ।
जम्बीराम्लेर्द्दिनं घृष्टं भवेदग्निकुमारकः ॥
विशुचीशूलवातादिवह्निमान्द्यप्रशान्तये ॥"
क्षारो यवक्षारः । अग्निकुमारो रसो विशु
च्याद्यजीर्णे ॥ ७ ॥
"पारदामृतलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं
तिन्तिड़ीफलरसेन मर्द्दितम् ॥
वह्निमान्द्यदशवक्त्रनाशनो
रामबाण इति विश्रुतो रसः ।
संग्रहग्रहणिकुम्भकर्णकं
सामवातखरदूषणञ्जयेत् ॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः ।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः ॥"८॥
पारदभागः १ विषभागः १ लवङ्गभागः १
गन्धकभागः १ मरिचभागः २ जातीफलभागः
॥० । रामबाणो रसोऽजीर्णे । इति भाव-
प्रकाशः ॥ ( विवरणमस्य यथा,—
"अग्निश्चतुर्व्विधः प्रोक्तः समो विषमतीक्ष्णकः ।
मन्दस्तदापरः प्रोक्तः शृणु चिह्नानि साम्प्रतम् ॥
वातपित्तकफे साम्यात् समत्वं जायतेऽनलः ।
तैरेव विषमं प्राप्ते विषमो जायतेऽनलः ॥
तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥"
इति हारीते चिकित्सितस्थाने षष्ठेऽध्याये ॥
"अन्नमण्डं पिबेदुष्णं हिङ्गुसौवर्च्चलान्वितम् ।
विषमोऽपि समस्तेन मन्दो दीप्येत पावकः ॥"
"सिन्धूत्थहिङ्गुत्रिफलायमानी-
व्योषैर्गुड़ांशैर्गुड़िका प्रकुर्य्यात् ।
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे ॥
मन्दः अग्निर्यस्येति । अल्पाग्निविशिष्टे, त्रि ।
यथा, मार्कण्डेये । १५ । १३९ ।
"सोऽजीर्णव्याधिदुःखार्त्तो मन्दाग्निः संप्र-
जायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मावघट्टनम् ॥" )
मन्दायुः, [ स् ] त्रि, ( मन्दमल्पमायुर्यस्य । )
अल्पायुः । यथा, श्रीभागवते । १ । १६ । १० ।
"मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्म्मभिः ॥"
मन्दारः, पुं, ( मन्द्यते स्तूयते प्रशस्यते वेति । मदि
+"अङ्गिमदिमन्दिभ्य आरन् ।" उणा० ३ ।
१३४ । इति आरन् । ) स्वर्गीयपञ्चवृक्षान्त-
र्गतदेवतरुविशेषः । यथा, अमरकोषे ।१।१।५३।
"पञ्चैते देवतरवो मन्दारः पारिजातकः ।